Shri Raghunatha Temple MSS. Library,
JAMMU

No. १२५८ घ

Title न्याय सिद्धान्त रहस्यम्

Author गोविन्दशर्मा

Extent ११ पत्राणि Age

Subject न्याय वैशेषिकम्

न्यायसिद्धान्तरहस्यम्

१२५८ प्रथमपत्राभावः

यद्धि स्यात्तत्तीयकं ॥ पूर्वंभावोपि नसहहेतुमान्सा ययस्य वा ॥ १० ॥ यद्धेतेऽन्यस्य
वापोर्थ्ये ज्ञात्वा यत्पूर्ववर्तिता ॥ जनकस्यापि वापोर्थ्यं मज्ञात्वा यस्य पूर्वता ॥ ११ ॥
नग्न्यथेतोऽथानिरिक्तो नियता वश्यकार्थयः ॥ ते स्युः पंचाऽन्यथा सिद्धास्तत्करीला
दिकमादिमे ॥ १२ ॥ पटादौ तंतुरूपादिद्वितीयं स्वेत्ततीयकं ॥ कुविंदजकस्तूर्यः पंचमं
रासभादयः ॥ १३ ॥ प्रत्यक्षमनुमानं चोपमानं शब्द एव च ॥ एवं प्रभेदतस्तेषु प्रमाणं
स्याच्चतुर्विधं ॥ १४ ॥ प्रत्यक्षं माध्यं क्षिकधीकरणं सा च सा भवेत् ॥ ज्ञानाकरणिका या
धीः सापि षड्विधा मता ॥ १५ ॥ एकात्विंद्रियजन्या या सा निर्त्या भावतो परा ॥ जन्यप्रत्य
क्षमात्रस्य करणं त्विंद्रियं भवेत् ॥ १६ ॥ सन्निकर्षश्चेंद्रियाणां व्यापारः परिकीर्तितः ॥ घ्राणर
सनं चक्षुस्त्वक् श्रोत्राणि तथा मनः ॥ १७ ॥ षडेतानींद्रियाण्येषां सन्निकर्षोपि

२

धा भवेत् ॥ लौकिकश्चालौकिकश्चालौकिकः ष[ ]ड्विधो मतः ॥ १९ ॥ द्रव्यस्य ग्र
हकस्तत्र संयोगः प्रथमो मतः ॥ संयुक्तसमवायो ऽन्यस्तथा तत्समवायिनां ॥ ॥
संयुक्तसमवेतेषु समवायो ऽथ तेष्वपि ॥ ग्राहकः समवेतानां समवायि तथापरः
२० ॥ शब्दस्य तत्त्वादीनां समवायः स्वयोनिषु ॥ विशेषणत्वं चाभावे ग्राहकः ष
ष्ठ उच्यते ॥ २१ ॥ अलौकिकः सन्निकर्षस्त्रिधा प्राचां मतं भवेत् ॥ सामान्यलक्षणस्त्वा
द्यः सामान्यज्ञानरूपवान् ॥ २२ ॥ तथा योगजधर्मो ऽन्यो ज्ञानलक्षण एव च
॥ असाधारणहेत्वादि ज्ञानरूपमपेक्षितं ॥ [ ] ॥ तद्भिद्यजातत्त्वमर्मजो कारकमतः
धि ॥ २४ ॥ द्वितीयो ऽप्युद्भिदयकः सन्निकर्षो ऽपि तस्य तु ॥ युक्तयुंजानयोर्भेदात्तृतीयोऽपि
द्विधा मतः ॥ २५ ॥ युक्तस्य सर्वदा सर्वगोचरज्ञानमिष्यते ॥ युंजानस्य विशिष्टादरीषध्या
नात्तदिष्यते ॥ २६ ॥ सामान्यलक्षणानंगीकारान्नव्यमते द्विधा ॥ द्रव्यालौकिकप्रत्य
क्षे महत्त्वोद्भूतरूपयोः ॥ २७ ॥ कारणत्वं द्रव्यसमवेताध्यक्षे च तादृशो ॥ एकार्थसमवा

आद्यास्तोयम
घयः सन्निकर्षे
धर्मिणां ॥ २३ ॥

॥ २ ॥

दिं ५

॥ २ ॥

येनतयोस्तत्समवेतगे॥२८॥ एकार्थसमवायेषु समवाये न हे[तु]ता॥ एवमालोकसंयोगस्त
त्वक्चाक्षुषकारणं॥२९॥ एवं त्वाचेऽपि प्रत्यक्षमुद्भूतस्पर्शहेतुना॥३०॥ द्रव्यादीनां चाक्षु
षादौ वर्त्तुर्योगादिकारणं॥३०॥ एवमिंद्रियभेदेन हेतुनाभेद इष्यते॥ अनुमायास्तु कर
णमनुमानं प्रकीर्तितं॥३१॥ व्याप्तिर्लिंगस्यानुज्ञानं स्वरूपं तस्य तत्र च॥ व्याप्तिरन्वयतः साध्यव
दन्यावृत्तितोच्यते॥३२॥ सामानाधिकरण्यं स्याद्धेतोर्वा व्यापके न सा॥ हेतौ स्वव्यभिचार
णाव्यभिचारानुमापकः॥३३॥ हेतुर्हेतुमतोर्यः स्यादेकधर्मविशिष्टयोः॥ अव्यापको व्याप
कः स्यात्स उपाधिरितिस्थितेः॥३४॥ तदभावो व्याप्तिरिति प्राचीनाः कचिदूचिरे॥ तदसमान
न्निषेधः सिद्धव्याप्तिसिद्धिपराहतः॥३५॥ साध्याभावव्यापकीभूताभावप्रतियोगि
ता हेतोर्यावतिरेके सा व्याप्तिपरिकीर्तिता॥३६॥ व्यापकत्वं चतद्भिन्नष्ठ

भावप्रतियोगिता। व्यभिचारग्रहाभावसहिता सहचारधीः॥३७॥ भवेद्व्याप्तिग्रहे
3 हेतुर्न भूयोदर्शनादिकं। अन्वयव्यतिरेकाभ्यां सहचारोपि च द्विधा॥३८॥ परामृ
र्शो भवेद्व्याप्तिः पक्षधर्मत्वनिश्चयः। सह पारोऽनुमायालुकरतां व्याप्यतामतिः॥
॥३९॥ सा च संदिग्धसिन्नाया पक्षताऽन्यधीर्भवेत्। अथवा केचिदादायाऽनुमितीचै
त्रमैत्रयोः॥४०॥ तद्वृत्तियावज्जातीनां भाश्रयोनुमिति भवेत्॥ सामानाधिकरणे
न सिषाधयिषयायुताः॥४१॥ याः सिद्धप... स्तद्विरहो विशेष्यत्वेन पक्षता। तज्जोऽनु
मानं त्रिविधं केवलान्वयिसाध्यकं॥४२॥ केवलव्यतिरेक्यन्य तद्द्वयोभयरूपिकं॥ तत्र
२ वृत्तिमदत्यंताभावस्याप्रतियोगिता॥४३॥ केवलान्वयिन...द्वा साध्यं ज्ञेयं दिलक्षणे
यत्राऽज्ञातान्वयं साध्यं केवलव्यतिरेकिता॥४४॥ भेदे साध्येऽजलादीनां पृथि २

वालादिकं यथा। अन्वयव्यतिरेकि स्यात् ज्ञातान्वयवियोगिकं॥५५॥ दहनादौ य
थासाध्ये धूमादिः पर्वतादिषु। उपमायास्तु करणमुपमानमिहोच्यते॥५६॥
सादृश्यधीस्व[illegible]रूपं तथा तु ग्राम्यादिवाक्यतः। वाक्यार्थस्यातिदिष्टस्य
स्मृ सा व्याप्तिर्मता॥५७॥ ततस्तत्पदानां तु शक्तिधीर्योपमा तु सा॥ तल्लक्षणं लना
यमनुमोक्तप्रकारतः॥५८॥ आमाण्यं रूपमानस्य पृथक् व्याप्यां प्रजानता॥ तद्वा
पारादिसद्भावउपमानात्प्रमादयात्॥५९॥ स्वसामानोर्थवाक्यार्थप्रमाजः शब्दप
नहि॥ प्रमाणं शाब्दप्रमितिकरणं वीसताहशः॥५०॥ शाब्दबोधे तु करणं पदज्ञानं
पदार्थधीः॥ व्यापारस्तद्विबोधाद्यास्तत्र स्युः सहकारिणः॥५१॥ शक्तिलक्षणयोर्भेदा
वृत्तिर्द्विविधा भवेत्॥ अयमर्थः पदादस्माद्बोद्धव्य इति येश्वरी॥५२॥ इच्छा शक्तिःकस्त
माशक्यः संबोधो लक्षणोच्यते॥ प्रमाणं चानुमानादि शक्तेः स्याद्ग्राहकत्रयं॥५३॥ त्रा

आक्षाकांसत्तितात्पर्यं निश्चयानां च हेतुता। शाब्दबोधे योग्यताया ज्ञानमात्रं
च कारणं ॥८४॥ विनान्येन पदेनस्याद्यत्पदं नान्वयार्थकं ॥ आकांक्षा तस्य तेनै
वासत्तिस्त्वव्यवधायिता ॥८५॥ वक्तुरिच्छा तु तात्पर्यं योग्यताबाधशून्यता ॥ अथ
वैकपदार्थेन पदार्थो योग्यतां भवेत् ॥८६॥ शब्दस्यापि प्रमाणत्वमुपमानवदिष्यते ॥ आ मा ४
त्मदेहेन्द्रियार्थाश्च बुद्धिर्मनस्तथैव च ॥८७॥ दोषप्रेत्यभावश्च फलदुःखसमोक्षकौ ॥
एवं तु द्वादशविधं प्रमेयं परिकीर्त्तितं ॥८८॥ इन्द्रियाणामधिष्ठाता आत्मेत्यभि
मानः॥ नेन्द्रियाणां हि चैतन्यमुपघातेप्यतः स्मृतिः ॥८९॥ न च बुद्धिः शरीरस्य मृते यत्ना
द्यनुद्भवात्॥ न चैतन्यं मनस्यत्र त्वनित्यस्यापि च चेतसः ॥९०॥ अतोतिरिक्त आत्मा
ऽस्य नित्यत्वे भाववादपि॥ द्विधा स चात्मा सर्वज्ञो जीवभेदात्तु देहतः ॥९१॥ चेष्टाश्रयः ४
शरीरं स्यादङ्गायतनमात्मनः॥ इन्द्रियाणि तथोक्तानि पंच घ्राणादिकानि तु ॥९२॥ इन्द्रिय

त्वंतु मन संसिद्धं वैशेषिको क्तितः। द्रव्यं गुणा कर्म जाती विशेष समवायिको॥६३॥ अभाव
श्चेति व्याख्यार्थाः सिद्धा वैशेषिके मते॥ तत्र द्रव्याणि पृथिवी जलं तेजो मरुन्नभः॥६४॥ का
लदिग्देहि चित्तानि चैवं नव गुणा अथ॥ रूपं रसस्तथा गंधः स्पर्शः संख्या तथा मितिः॥
६५॥ तथा पृथक्त्वं संयोगविभागश्च परत्वकं॥ अपरत्वं बुद्धिसुखदुःखेच्छाद्वेषयत्नको॥
६६॥ गुरुत्वं च द्रवत्वं च स्नेहसंस्कार एव च॥ धर्माधर्मौ तथा शब्दश्चतुर्विंशतिरित्यथ॥६७॥
कर्माण्युत्क्षेपणावक्षेपणाकुंचप्रसारणं॥ गमनं चेति पंचैव जातिस्तु द्विविधा भवेत्॥
६८॥ परा चैवापरा चेति तत्र सत्ता पराऽपराः। द्रव्यत्वाद्या विशेषस्तु नित्यद्रव्यगतो व्यक्तः॥
६९॥ संबंधो गुणगुण्यादेः समवायः प्रकीर्तितः। अभावस्तु द्विधा भेदसंसर्गाभावभेदतः॥
७०॥ प्रागत्यंताभावनाशभेदाद्दंत्यस्त्रिधा भवेत्॥ एतेष्वेव नव येष्वाद्यास्तेऽर्थत्वेनात्र की
र्तिताः॥७१॥ साधर्म्यं षष्ठुभावत्वं ज्ञेयत्वादि तु सप्तसु॥ द्रव्यादीनां तु पंचानां समवेतत्वमुच्य
ते॥७२॥ सत्तावत्वं त्रयाणां तु द्रव्यस्य गुणकर्मणि॥ समवायितया तद्वद्धेतुत्वं कार्यमात्रके॥७३॥

तथैवासमवायित्वं साधर्म्यं गुणकर्मणोः। गुणादीनां तथा पञ्चानां क्रियागु-
णनियोगिता। २४॥ क्षित्यादीनां नवानां तु द्रव्यत्वं क्षितितोययोः। गुरुत्वरस-
वत्त्वेऽथ क्षित्यादित्रितये ष्वपि॥ २५॥ चाक्षुषं द्रव्यरूपित्वस्पर्शिमो वतुष्-
5 पि। तथा पंचसु भूतत्वं हि दिक्ष्मादि चतुर्षु च॥ २६॥ परापरत्वमूर्तत्वक्रियावेग-
विशिष्टता। विभुत्वाति महत्वे च नभःकालादिगात्मनां॥ २७॥ द्विक्षण-
स्थो व्याप्यवृत्तिर्यस्तु वैशेषिको गुणः। सर्वात्मनोः कालदिशोर्विशेषगु-
ण स्मृन्यता। २८॥ तथा कार्यनिमित्तत्वं साधर्म्यं यस्य यद्भवेत्॥ तत्तदन्यस्य
४ वैधर्म्यं पृथिवीत्वं यथा क्षितेः। २९॥ एवं च नित्यद्रव्याणां विशेषा समवेत
ते। रूपाद्येकादश तथा द्रवत्वं च निमित्तजं॥ ३०॥ ४

स्थितिस्थापकवेगाख्यः संस्कारः सगुरुत्वकः॥ एते चतुर्दश गुणाः पृथिव्या
मथ वारिणि॥८१॥ रूपं रसोऽथ स्पर्शाद्याः संस्कारो वेगलक्षणः॥ स्वाभाविक
द्रवगुरुत्वे स्नेहश्च चतुर्दश॥८२॥ स्पर्शाद्या अष्ट रूपं च संस्कारो वेगलक्षणः॥
वै४ नैमित्तिकद्रवत्वं तेजस्यथ समीरणे॥८३॥ स्पर्शादयोष्टौ वेगश्च विहायसि
सशब्दकाः। संख्यादिपंचकं कालदिशोस्तन्मात्रमात्मनः॥८४॥ तद्वद्बुध्यादिष
ट्कं च संस्कारो भावनात्मकः। धर्माधर्मौ च बुद्धीच्छाकृतयश्च तथेश्वरे॥८५॥
संख्यादिपंचैर्युताः संख्याद्या वेग एव च। परत्वं चापरत्वं चेत्यष्टौ स्यु
र्मनसो गुणाः॥८६॥ तत्र रूपं पृथिव्यास्तु नीलपीताद्यनेकधा। कटुः कषा
यो मधुरस्तिक्तो अम्लो लवणस्तथा॥८७॥ सा षडेते गंधस्तु सुरभ्यादिर्द्विधा

मतः॥ पाकजोऽनुष्णशीतस्य स्पर्शस्सा च द्विधा भवेत्॥ ८८॥ नित्यानित्य
6 प्रभेदेन तत्र नित्याणुलक्षणा॥ समवेता त्वनित्या स्यात् त्रिविधा सा प्रकथ्यते॥ ८९॥
शरीरमिंद्रियं चेति विषयश्चेति भेदतः॥ योनिजं चायोनिजं च शरीरं द्विविधं भवेत्
॥ ९०॥ जरायुजांडजभेदेन योनिजं द्विविधं मतं॥ अयोनिजं तु देवादिशरीरं धर्म
हेतुकं॥ ९१॥ इंद्रियं तु भवेत् घ्राणं गंधतत्त्वाभिबोधकं॥ मृत्पाषाणादि विष
यापभोगस्य साधनं॥ ९२॥ रूपं च शुक्लं मधुरो रसस्पर्शोऽनुष्णशीतलः॥ क्षिति
वन्नित्यता या सा शरीरं क्लिन्नयोनिजं॥ ९३॥ उपष्टंभं च पृथिवीभागे स्तभोगसा
धनं॥ इंद्रियं स्यात्तु रसनं रसतत्त्वाभिबोधकं॥ ९४॥ पारावारादिविषयं तेज ६
सः शुक्लभास्वरं॥ रूपं शुक्लं तथा स्पर्शो नित्यतादि च वायुवत्॥ ९५॥ ई
६

ड्रियं नेत्रमुद्भूतरूपं तद्ग्राहकं मतं। तग्रह्णाति द्रवत्वं च तथा संख्यादिसप्त
कं।९६॥ दिवाकरकरादिस्तु विषयोऽथ समीरणः॥ अपाकजोऽनुष्णाशीतस्पर्शस्प
र्शादिलिंगकः॥९७॥ उद्भूतरूपविरहादिति ज्ञो चःप्रवक्ष्यते॥ तस्य चाक्षुषहेतुर्नो
उद्भूतस्पर्शवत्तया॥९८॥ शीतस्पर्शाभिमरुतमित्याद्यनुभवादपि॥ त्वाचाध्य
क्षविषयेन व्याप्याहुस्तं विदुः॥९९॥ तच्चित्रमतादिति तेजोवह्निव्याऽपित्वमिद्रि
यं॥ सोऽद्भूतत्वादिकोद्भूतस्पर्शतद्ग्राहकं मतं॥१००॥ रूपतन्मात्रवत्त्वं च चाक्षुषग्राह्य
कैचतत्वं उत्ताधिभेदाद्वैकस्य कलाकाष्ठादिरूपता॥१०१॥ कलास्तु ज्ञेयदाधारो
विशेषेणातया भवेत्॥१०३॥ आद्यादिशब्दविषयश्चैवं दिगपिदर्शिता॥ आत्माभिर
जितं सर्वं मनो नित्यं च लाघवात्॥१०४॥ क्षुधादीनां गुणानां तु चस्मीतन्नहकं
भवेत्॥ अन्यथानुपपत्त्या च वासे मादेस्तु दिष्यते॥१०५॥ तच्चाज्ञानायोग्य

द्विध्य व्यञ्जनवातादिर्विषयो भेदतः॥ त्वादृस्त
ऋतधर्मा लोग्याहकैचनदेवहि॥१०२॥ ४

घात्प्रत्यात्मैकमथाणु च। एवं परीक्षितं द्रव्यं परीक्ष्यंते गुणाः॥ अथ॥१०६॥
रूपं रसस्तथा गंधः स्पर्शः स्नेहः सवेगकः। परत्वं चापरत्वं च द्रवत्वं च गु
रुत्वकं॥१०७॥ एते मूर्त्तगुणा बुद्ध्यादिषट्कादृष्टभावनाः॥ शब्दश्चैतमूर्त्तगु
णाः संख्याद्याः पंच चोभये॥१०८॥ संयोगश्च विभागश्च द्वित्वं च द्विपृ
थक्त्वकं॥ एतेऽनेकाश्रिताः शेषास्त्वेकैकद्रव्यवर्त्तयः॥१०९॥ स्पर्शांत
स्नेहबुद्ध्यादि षट्कादृष्टभावनाः॥ जलद्रवत्वशब्दाश्च मता वैशेषिका गुणाः॥
१०१०॥ एतद्भिन्नास्तु सामान्या गुणाः सर्वे प्रकीर्त्तिताः॥ घ्राणग्राह्यास्तु
संख्यादि सप्तस्नेहद्रवत्वकाः॥१११॥ बाह्यैकैकेंद्रियग्राह्याः स्पर्शांता यद्वद्

नवाहृष्टाद्यपक्षेन ध्यपक्षा गुरुत्वादृष्टभावना।।१[illegible]।। विभुवैशेषिकगुणा
स्त्व कारणगुणोद्भवाः।। स्पर्शान्तोपकजमानं स्नेहैकत्वे गुरुत्वकै
११३।। स्थितिस्थापकवेगैकपृथक्त्वापाकजोद्भवाः।। एते हे तु गु
णाः संयोगादिद्वयं तथा।।११४।। वैशेषिका विभुगुणाः संबंध्यव्या
प्य नयः।। स्पर्शान्तः स्नेह भिन्नयः परत्वापरभावमताः ११५।। परापर
त्वे द्वित्व द्विपृथक्त्वादिनिमित्तके।। तत्र रूपरसौ नित्यावपार्थिवप
पद्मागुणौ।।११६।। गंधस्सर्वस्व नित्यस्यात्स्पर्शो नित्य अरूपवत्।। स
चानुष्णाशीतः शीतोष्णभेदात्त्रिविधो मतः।।११७।। आग्रस्तु द्वि
विधः पाकजन्यात्र न्याय भेदतः।। कोटिन्यं सोऽनुमायाम्भापाकजोऽ

वै४

४ पिद्धिर्वा क्षितौ ॥११८॥ तत्र नैयायिकनये पाकजोऽवयविनामपि । प
रमाणौ परनये पाकजान्यस्य मारुते ॥११९॥ एकादिव्यवहारस्य हेतुः
धा ३ संख्या द्विच सा । नित्यानित्या च नित्यानामेकं नित्यमुच्यते ॥१२०॥ अनि
त्या तु तदन्या स्याद्द्वित्वादयः पुनः ॥ अनेकाश्रयपर्याप्ता अपेक्षाबुद्धिसंभ
वाः ॥१२१॥ अयमेकमयं चैक इत्याद्यास्ता हि बुद्धयः ॥ नाशो नाशात्तु तन्नाशः
परिमाणं चतुर्विधं ॥१२२॥ अणुदीर्घमहद्ध्रस्वमेषु नित्यस्थितं चेतरत् ॥ नित्ये न
नित्यं च अन्येषु त्रिविधं तस्य कारणं ॥१२३॥ संख्या च परिमाणं च प्रचयश्चेति
तेषु च ॥ संयोगः शिथिलाख्यो यः प्रचयः स उदाहृतः ॥१२४॥ तद्धि सम्
अपध्वंसात्संख्यावद्वै पृथक्त्वकं ॥ अप्राप्तयोस्तु या प्राप्तिः सा संयोग

स्त्रिधा भवेत्ः॥१२५॥ एककर्मोद्भवस्त्वाद्यो द्वयकर्मसमुद्भवः॥ तथा संयोगज
श्चान्यस्तत्राद्यः श्येनशैलयोः॥१२६॥ द्वितीयो मल्लयोरेष्यः संयोगी तन्तुकुम्भयो
ः॥ संयोगः कुंभघटयोः कर्मजोपि द्विधा भवेत्॥१२७॥ अभिघातो नोदनं वाऽ
भिघातः शब्दकारणी॥ संयोगवद्विभागोपि त्रिधा किन्तु विभागजः॥१२८॥ द्विविधो हेतु
मात्रीयविभागोत्थस्तथापरः। हेतुहेतुविभागोत्थः परत्वं चापरत्वकं॥१२९॥ द्विविधं का
लदेशाभ्यां मूर्त्तमात्रेतु दैशिकं॥ कालिकं त्वन्यकृत्वेषु वक्ष्यते बुद्धिरंगतः॥१३०॥
सुखं तु धर्मजं काम्यं निरूप्यं दुःखमप्यतः॥ इच्छा तु ज्ञानजन्या स्यात्फलोपायाद्विजा च
रा॥१३१॥ द्वेषस्तु द्विष्टहेतुत्वजन्यधीस्त्रिविधा कृतिः। प्रवृत्तिश्च निवृत्तिश्च तद्वज्जी
वनहेतुका॥१३२॥ प्रवृत्तेः कारणी वाचैं निवृत्तिर्द्विष्टहेतुका॥ जीव्याशरीरे प्राणानां संचा
चारे स्यात्कारणी भवेत्॥१३३॥ गुरुत्वमपि नित्यस्थं नित्यमन्यत्स्थकारणी॥ पतनासम
वायित्वमपि तत्रैव वर्तते॥१३४॥ निमित्ततः स्वभावाच्च द्रवत्वं द्विविधं भवेत्॥

तन्निमित्तं संग्रहस्य स्पंदनासमवायिवत्॥१३५॥ जलीयपरमाणौ तन्नित्यं स्नेहोऽ
पि लाद्दृशः॥ संस्कारस्त्रिविधा वेगस्थितिस्थापकभावना॥१३६॥ स्थितिस्थो वेगो मूर्तमा
त्रैकमजो वेगजस्य सः॥ छ्रुतायः दृष्टविषयावृत्तिर्भावना स्मृतिकारणं॥१३७॥ आत्मस्थो जीव
ने चैवाऽनुपेक्षात्मकनिर्णयात्॥ स्वर्गापवर्गजनको धर्मो यागादिहेतुकः॥१३८॥ स नाश्य
ते कीर्तनाद्यैरधर्मो नरकप्रदः॥ निषिद्धाचरणोद्भूतः प्रायश्चित्तेन नाश्यते॥१३९॥ वर्ण
ध्वनिप्रभेदेन शब्दो द्वौ वर्ण-आदिकः॥ ध्वनिर्भेर्यादिभवादिर्वर्णो नित्यो महान् स्वनः॥१४०॥
विनष्टोऽन्यसमुत्पन्नाद्युत्पादिः प्रतिपादितः॥ एवं निरूपिता मूर्ता अथ बुद्धिर्निरूप्यते
१४१॥ द्विविधा तु भवेद्बुद्धिरनुभूतिस्तथा स्मृतिः॥ चतुःप्रमाणीजन्या स्यादनु
भूतिश्चतुर्विधा॥१४२॥ निर्विकल्पा सविकल्पाभ्यां द्विधा सापि चतुर्विधा॥ नि
र्विकल्पे तदध्यक्षं नेष्टाविषये तु यत्॥१४३॥ तद्भिन्नं सकलं ज्ञानं सविकल्पे तु

मुच्यते॥प्रमाचैवप्रमाचेतिद्विविधस्सविकल्पकः॥१२४॥तत्रप्रमाता
तच्छून्येतन्मतिस्त्वप्रमोच्यते॥तद्विशेषाविपर्यासःसंशयादिस्तुव
क्ष्यते॥१२५॥हेतुःप्रमाप्रतिगुणोदोषःस्यादप्रमांप्रति॥सोनिकर्षावि
शेषणप्रत्यक्षेतुभवेद्गुणः॥१२६॥अनुमायांतुसाध्यवतिपरा
मर्शोगुणोभवेत्॥उपमायांगुणःशक्तिविशिष्टसदृशत्वधीः॥
१२७॥शाब्दप्रमायांगुणोयोग्यतायाःप्रमाभवेत्॥दोषास्त्वनेकोप
त्तादिरूपाज्ञगतिजाप्रति॥१२८॥विजातीयप्रत्यक्षप्रवृत्तिस्तत्रकारणं
॥कृतिःसाध्यत्वधीस्तद्वदिष्टसाधनतामतिः॥१२९॥दुष्टेचबलवद्विष्टाजनकं

सद्धिवक्षितो। प्रकारश्चेति साक्ष्यध्यत्वं यत्रेष्टा साचकारतो॥ १५०॥ उपादानाध्यक्ष
10 मधिकारसौत त्रकथ्यते॥ एवं सिद्धत्वं धीसत्तस्या स्फूर्त्तिप्रतिबंधिका॥ १५१॥ अज्ञा
नादो वद्धविलिसिद्धिः स्वस्वरूपमणोऽपि तादृशी॥ रागद्वेषादयो दोषाज्ञात्वभावबु
न्धेनिः॥ १५२॥ भोगः फलं सोऽपि स्वस्वाधध्यक्षात्मकएव हि॥ एवं वबुद्धि
शब्देन तद्भिन्नमतयोच्यताः॥ १५३॥ एवं निर्णयशक्ताधावक्षमाणानतद्
ताः॥ दुःखं सत्वधर्मजन्यस्यात्गुणोऽनुभवसाक्षिकः॥ १५४॥ स्वसमानाधि
१० करणात्सुखप्राग्विरहितस्सतो॥ दुःखः स्य पाऽसातो नाशः सोपवर्गः प्रकीर्ति १०
तः॥ १५५॥ एकस्मिन्धर्मिणि मतिविरुद्धानेककोटिका॥ संशयस्स्या
त्साचाध्यक्षस्वरूपः शब्दोपि कुत्रचित्॥ १५६॥ सामानामेकधर्मादिज्ञान

घ ४

सध्यत्रकारत्तौ ॥ स संशयो मतिर्यास्यादेकत्राभावभावयोः ॥ १५७ ॥ दृष्टत्वं स्वसङ्ग्र
व मात्र कोटिकेऽव्याप्तिदर्शनात् ॥ प्रवृत्तेर्वा निवृत्तेर्वा येन रूपेण यद्भवेत् ॥
१५८ ॥ उद्दिश्यते न रूपेण तत्प्रयोजनमुच्यते ॥ स दृष्टान्तो भवेद्यत्र निर्णयो
हेतुसाध्ययोः ॥ १५९ ॥ अभ्युप सर्वतन्त्रसिद्धान्तोऽन्य स्वप्रतितन्त्रसिद्धान्तः ॥ ए
कस्यैवाधिकरस्यासिद्धान्तस्याभ्युपगमसिद्धान्तः ॥ १६० ॥ एवं च भेदेन सि
द्धान्तः स्याच्चतुर्विधः ॥ सर्वतन्त्राविरुद्धो यः स्वतन्त्रेऽपि च वर्तते ॥ १६१ ॥
स सर्वसिद्धान्तो घ्राणादीन्द्रियतादिवत् ॥ समानतन्त्रासिद्धो यः प
रतन्त्रानिराकृतः ॥ १६२ ॥ स न्यायवद्धि प्रतितन्त्रसिद्धान्तस्स कथ्यते
यथा नैयायिकनये क्षित्यादेः क्षितिजन्यता ॥ १६३ ॥ अन्यप्रकरणा

सिद्धो यस्सिद्धिमप्यविसेषोऽधिकस्तत्सिद्धितः। अनुमानेऽधिलिंकर्तुर्यथावलद्बु-
द्धिनित्यत्वं॥१६४॥ अनुरूपितामुपगमो भवति तथा चाभ्युपगमसिद्धितः॥
मनसोऽयमौद्धिपत्वं न्यायमते पंचवावयववाः॥१६५॥ प्रतिज्ञा च तथा हेतु-
रुदाहरणमेव च॥ उपनीतिर्निगमनमिति ते पंच तत्र च॥१६६॥ प्रतिज्ञा सा-
ध्यनिर्देशो हेतुर्ज्ञापककीर्तनं॥ व्याप्तत्वबोधकं वाक्यमुदाहरणमु-
च्यते॥१६७॥ साध्यव्याप्यनयाहेतोर्यत्पक्षे परिकीर्तनं॥ तस्योपनयसं-
१२ ज्ञा तेन साध्यस्य कीर्तनं॥१६८॥ भवेन्निगमनं तर्के ऊहः शंकाभिरासकृ-
त्॥ सा निर्णयो यामयति संशयान्याविशिष्टधीः॥१६९॥ वादस्तत्वबुभु- १२

ना २

सि ४

स्वोयाकथा ऽजल्पस्तथोच्यते ॥ परपक्षानिरासेन यास्वपक्षव्यवस्थितिः ॥ ७० ॥
स्वपक्षहीनानुकथा वितंडासैव कथ्यते ॥ सा पक्षाद्दूरतो यत्ज्ञानं प्रतिबंध
कं ॥ ७१ ॥ अनुमायां भवेयुस्ते हेत्वाभासास्त एव च ॥ व्यभिचारो विरुद्धश्च तथा
सत्प्रतिपक्षितः ॥ ७२ ॥ असिद्धबाधौ चेत्येवं भेदाः पंचविधा मताः ॥ व्यभिचारस्त्रिधा
तत्र स्यात्साधारण आदिमः ॥ ७३ ॥ अन्योऽसाधारणश्चैवाऽनुपसंहार्य्यथांतिमः ॥
असिद्धस्त्रिविधा पक्षस्वरूपव्याप्तिभेदतः ॥ ७४ ॥ अर्थेनाऽभिमते वक्तुर्वि
कल्पमूलमुच्यते ॥ वाक्सान्योपचारैश्च भेदैस्त्रिविधो भवेत् ॥ ७५ ॥ उत्
दूषणाशक्तौ जातिरित्यभिधीयते ॥ प्रतिज्ञाहानिरन्यास्यात्प्रतिज्ञांतरमे
व च ॥ ७६ ॥ प्रतिज्ञाया विरोधश्च तत्संन्यासस्तथैव च ॥ हेत्वंतरमथार्थान्तरं
निरर्थकमवच ॥ ७७ ॥ अविज्ञातार्थकं तद्वदपार्थाप्राप्तकालकं ॥ न्यूनं च

वाधिके चैव पुनरुक्तिस्तथैव वा ॥ १७८ ॥ अननक्रिया ज्ञानं तथा वा प्रतिभापरा ॥
विक्षेपश्च मतानुज्ञाऽननुयोज्यापेक्षणं तथा ॥ १७९ ॥ तथा निरनुयोज्यानुयोगो
ऽसिद्धांत [illegible]व च ॥ हेत्वाभासस्तथा वान्या द्वाविंशतिरमूनि तु ॥ १८० ॥ भवंति
निग्रह[illegible]नान्यवं नैयायिकेन ये ॥ पदार्थाः षोडशाप्येवं प्रमाणाद्यति रूपि
ताः ॥ १८१ ॥ एतन्न्यायरहस्यं रस्यसिद्धांतसौंवं धी ॥ गोविंदशर्म निर्मित
मममससाली मुदे भवतु ॥ १८२ ॥ शाके गगनीं सरशाद्रमन्मथ वीक्षमायुक्ते
१२ ॥ पक्षे सह सितवलक्षे गोविंदेन हि निरमायि ॥ १८३ ॥ इति न्यायरहस्यं स
माप्तं ॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ १२